# Shri Sarveshvara PrataH Stavam

# श्रीसर्वेश्वर प्रातः स्तवम्

## Document Information

Text title : Sarveshvara Pratah Stavam

File name : sarveshvaraprAtaHstavam.itx

Category : deities_misc, suprabhAta

Location : doc_deities_misc

Author : radhAsarveshvarasharaNadevAchArya

Transliterated by : Saritha Sangameswaran

Proofread by : Saritha Sangameswaran

Latest update : December 2, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 2, 2021

*sanskritdocuments.org*

# श्रीसर्वेश्वर प्रातः स्तवम्

ब्रह्मेन्द्रवृन्दारकवन्दिताय वृन्दाटवीधामविराजिताय ।
सर्वेश्वराय श्रुतिगोचराय प्रातर्नमस्ते प्रणतप्रियाय ॥ १॥

सनत्कुमारादिकसेविताय देवर्षि-निम्बार्कसमर्चिताय ।
सर्वेश्वराय श्रुतिगोचराय प्रातर्नमस्ते प्रणतप्रियाय ॥ २॥

श्रीराधिकावल्लभ माधवाय चित्राऽऽदिसख्यावलिरञ्जिताय ।
सर्वेश्वराय श्रुतिगोचराय प्रातर्नमस्ते प्रणतप्रियाय ॥ ३॥

अनन्तचिन्मङ्गलविग्रहाय सर्वार्थविद्यावरसम्प्रदाय ।
सर्वेश्वराय श्रुतिगोचराय प्रातर्नमस्ते प्रणतप्रियाय ॥ ४॥

प्रातः स्तोत्रं सुधापूर्णं सर्वेश्वरप्रभोरिदम् ।
राधासर्वेश्वराद्येन शरणान्तेन निर्मितम् ॥ ५॥

इति निखिल महीमण्डलाचार्य चक्रचूडामणि सर्वतन्त्रस्वतन्त्रान्तानन्त
श्रीविभूषित जगद्गुरु श्रीनिम्बार्काचार्यपीठाधिपति श्री
“श्रीजी” श्री श्रीराधासर्वेश्वरशरणदेवाचार्यजी महाराज
द्वारा विनिर्मित ॐ श्रीसर्वेश्वर प्रातः स्तवं सम्पूर्णम् ।

Encoded and proofread by Saritha Sangameswaran

*Shri Sarveshvara PrataH Stavam*
pdf was typeset on December 2, 2021

Please send corrections to *sanskrit@cheerful.com*